শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীপরাশরভট্টার্যৈরনুগৃহীতম্

# ॥ শ্রীরঙ্গনাথ তিরুমঞ্জনক্কট্টিযম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীরঙ্গনাথ তিরুমঞ্জনক্কট্টিযম্ ॥

শ্রীপরাশর ভট্টার্যঃ শ্রীরঙ্গেশপুরোহিতঃ।
শ্রীৱৎসাঙ্কসুতঃ শ্রীমান্ শ্রেযসে মেঽস্তু ভূযসে॥

অমৃতপ্রভৱং প্রভাপ্রভাৱ প্রহতধ্ৱান্তলসদ্বিলাসজাতম্।
সকলং সকলানুমোদহেতুং শশিনং ৎৱাং কলযামি রঙ্গরাজ !॥ **1** ॥

অনিশং কুমুদং ৱিকাসযন্তং
সততং পূর্ণমহর্নিশং চ দৃশ্যম্।
অনুপপ্লৱমদ্য রঙ্গরাজং মনুতে
চন্দ্রমসং জনোঽনুমান্যম্॥ **2** ॥

কুঙ্কুমারুণমুদঞ্চিত শ্রিযং
কোমলারুণ সরোজসংস্থিতম্।
রঙ্গমন্দির ! তমোনিৱারণং
শঙ্কতে তপনদীধিতিং জনঃ॥ **3** ॥

ভৱন্তং শ্রীমন্তং হসিতকলিকালঙ্কৃতমিহ
অশোকং কুর্ৱন্তং ভ্রমরহিতং অত্যুৎসৱকরম্।
সুখস্পর্শাশ্লিষ্যৎপৱনজমহানন্দ ভরিতং
ৱসন্তং রঙ্গেশং ! প্রকটসুমনস্কং মনুমহে॥ **4** ॥

সৎপক্ষপাতাৎ ভুৱনাশ্রযৎৱাৎ
সন্মানসাৱাস নিবন্ধনৎৱাৎ।
পদ্মাশ্রযৎৱাচ্চ ভৱানিদানীং
হংসো যথা রাজতি রঙ্গরাজ !॥ **5** ॥

অন্তস্স্থিতস্সুমনসাং অমরেশরত্ন
    চ্ছাযা ৱিকল্পিতরুচির্নযনাভিরামম্।
আপাতিতস্মরগুণঃ প্রথিতপ্রচারঃ
    শাখাসু রঙ্গনৃপতির্মধুপো ৱিভাতি॥ **6**॥

সার্ধং দ্বিজৈঃ শ্রাৱণকর্ম রঙ্গিন্
    কল্লোচিতস্নান ৱিধিং করোষি।
শ্রুতিস্মৃতিভ্যাং ৱ্যপদিশ্যমানং
    স্ৱযং মমাজ্ঞাং অনুৱর্তযামি॥ **7**॥

সমুন্মিষৎপদ্মজতার সংশ্রিতা
    তৱাৱতারক্রম পাঠতৎপরা।
ত্রযীৱ রঙ্গেশ ! সমর্থ্যতে জনৈঃ
    অসৌ জযন্তীত্যুদিতেযমষ্টমী॥ **8**॥

অমৃতমযমনন্তং সিদ্ধসর্ৱার্থজাতং
    নিযমিতসকলার্থং নিশ্চিতাত্মাৱবোধম্।
কিমিহ বহু নিরুক্তৈঃ কীর্তনাভীষ্টদং ৎৱাং
    নিগমমিৱ মনোজ্ঞং রঙ্গরাজাদ্য মন্যে॥ **9**॥

শ্যামাভং মকুটোপেতং কটকাঞ্চিতমুন্নতম্।
সত্ত্বাশ্রযং রঙ্গরাজং মহীধরমৱৈম্যহম্॥ **10**॥

সত্ত্বোন্নতস্সকল সত্ত্ব নিৱাসভূমিঃ
    সৌৱর্ণরম্য ৱিভৱস্সুমনো মনোজ্ঞঃ।
সদ্বৃত্তসঙ্গ সমধিষ্ঠিত পার্শ্ৱদেশঃ
    শৈলাত্মনা স্ফুরসি রঙ্গমহীশ্ৱর ! ৎৱম্॥ **11**॥

অশেষাশাপূর্তিং ৱিদধতমনেকৈঃ স্ৱৱিভৱৈঃ
প্রসিদ্যৎকল্যাণং প্রকটতর পীতাম্বর রুচিম্।
কৃতস্বাস্থ্যোৎসেধাৎ নিখিলসুমনঃ প্রীতিজননং
ভৱন্তং মন্যেঽহং সুরশিখরিণং রঙ্গনৃপতে ! ॥ **12** ॥

মরকতমণিরম্যং রম্যমাণিক্যমুক্তা
ফলৱিলসিতগাত্রং প্রস্ফুরদ্গন্ধৱাহম্।
ৱিহিতৱিৱিধজন্তুং প্রোল্লসন্মীনলীলং
সুগমজলনিধিং ৎৱাং মন্মহে রঙ্গরাজ ! ॥ **13** ॥

মণিৱররুচিৱাহী মৎস্যরূপং দধানো
ললিতধৱলশঙ্খো লঙ্ঘযন্নেৱ ৱেলাম্।
ৱিধৃতভুৱনভারো ৱীক্ষ্যসে রঙ্গধামন্
অপর ইৱ ৱপুষ্মানাপগানামধীশঃ ॥ **14** ॥

নানানুৱৃত্তি ৱিষযং নতরাজহংসং
নানাণ্ডজাত সমধিষ্ঠিতমঞ্জরম্যম্।
সেৱাৱতীর্ণ সুমরুদ্গণমদ্য রঙ্গিন্ !
ভাৱানুরূপ নদমিত্যনুমন্মহে ৎৱাম্॥ **15** ॥

ৱৃত্তির্ৱেগৱতী সমাশ্রিতজনত্রাণে ভৱচ্চেতসঃ
তাম্রা কুঙ্কুমপত্রিকা ভুজতটী তে তুঙ্গভদ্রোজ্জ্ৱলা।
রঙ্গাধীশ্ৱর ! নর্মদা চ ভণিতিঃ শোণস্সুজাতোঽধরঃ
তস্মাৎ স্নান ৱিধৌ জনো হি মনুতে ৎৱাং সর্ৱতীর্থাত্মকম্॥ **16** ॥

অনেকশাখাশ্রিতমাশ্রিতেভ্যো
দত্তাধিকাংশং ত্রিদশৈকভোগ্যম্।
সুপর্ণরম্যং সুমনস্সমেতং
সুরদ্রুমং ৎৱাং সুধিযো ৱদন্তি॥ **17** ॥

শ্রীমৎ সুরঙ্গধরণীশ ! ৱিশালশাখং
    শ্রীকৌস্তুভস্ফুরিতমীপ্সিতদানদক্ষম্।
হংসাদি সদ্দ্বিজ ৱরৈরুপসেৱ্যমানং
    ৎৱাং মন্মহে সুরতরুং সুরনাথনাথ॥ **18**॥

অদ্যাযতে লসতি হল্লকপুষ্পমালা
    ৱক্ষস্স্থলে ৱিনিহিতা তৱ রঙ্গরাজ !।
স্বচ্ছন্দৱারি কমলাচরণারৱিন্দ -
    মাণিক্যনূপুর মযূখ পরংপরেৱ॥ **19**॥

রঙ্গেশ ! রজনীচর্চা রাজতে তৱ ৱক্ষসি।
দেৱ্যা হিরণ্যৱর্ণাযাঃ দেহকান্তিরিৱোত্থিতা॥ **20**॥

সর্ৱস্মাৎপর ! সাংপরাযসৱনে শক্তিস্তৱেচ্ছাত্মিকা
    পত্নী পাত্রগণশ্চ হেতিপতযঃ প্রাপ্তর্ত্ৱিজো বাহৱঃ।
পৌলস্ত্যাঃ পশৱো দশাননমুখাঃ রক্ষাফলং জ্ঞানিনাং
    শ্রীমন্ ! মজ্জনকৈতৱাদৱভৃথস্নাতেৱ রঙ্গেশ্ৱর !॥ **21**॥

ক্রিযাদর্শে দর্শে কৃতমখৱিধীনামুপগতে
    প্রৱৃত্তস্নানাংস্ত্বং পরমুদযসে রঙ্গতরণে।
প্রকর্ষেণোদ্বুদ্ধ দ্বিজকুলমশেষং প্রতিদিশং
    প্রহৃষ্টা পদ্মোৰ্ৱী ভৱতি চ জগৎ ধ্ৱস্ততিমিরম্॥ **22**॥

চন্দ্রার্কৌ রঙ্গধামন্ ! শ্রৱণমুপাগতৌ চক্ষুরাকারযোগাৎ
    মান্যোঽমা সঙ্গমস্তে সদসি বহুমতো মিত্রৱারস্য যোগঃ।
কালোঽযং পুষ্যদিষ্টো ভৱতি মযি মহাংস্ত্বৎকটাক্ষস্য পাতঃ
    ৎৱৎকান্ত্যব্ধেশ্চ সেতুস্ত্বমসি ৱযমিহ প্রাপ্ততীর্থা ভৱামঃ॥ **23**॥

পদ্মাৱিদ্যুদলঙ্কৃতাঙ্গৱিভৱং গংভীরনাদাশ্রযং
    সান্দ্রেন্দ্রোপলকান্তিচোরৱপুষং সন্তাপৱিধ্ৱংসিনম্।
কারুণ্যাম্বুভরাশ্রযং ৱিদধতং সচ্চাতকানাং মুদং
    মান্যং মেঘমমোঘপূর্ণফলদং রঙ্গাধিপং মন্মহে॥ **24**॥

ৎৱং মেঽহং মে কুতস্তত্তদপি কুত ইদং ৱেদমূল প্রমাণাৎ
    এতচ্চানাদি সিদ্ধাদনুভৱ ৱিভৱাৎ তর্হি সাক্রোশ এৱ।
ক্বাক্রোশঃ কস্য গীতাদিষু মম ৱিদিতঃ কোঽত্র সাক্ষী সুধীস্স্যাৎ
    হন্ত ৎৱৎপক্ষপাতী স ইতি নৃকলহে মৃগ্যমধ্যস্থৱৎ ৎৱম্॥ **25**॥

উত্তরীযপটিকা ৱিরাজতে রঙ্গরাজ ! ভৱতো ভুজান্তরে।
সৎপথে শতমখোপলপ্রভে জাহ্নৱীৱ শরদভ্রনির্মলা॥ **26**॥

পশ্যৎসুরাসুরগণং সুমনোৱিকাস -
    সৎসিদ্ধচারণসমূহ নিষেৱ্যমাণম্।
সংদৃষ্টচারুতর সারতরামৃতৌঘং
    ৎৱাং রঙ্গরাজ ! কলযামি হি মন্দরাদ্রিম্॥ **27**॥

॥ ইতি শ্রীরঙ্গনাথ তিরুমঞ্জনক্কট্টিযং সমাপ্তম্॥